हाडु - हन्नोंदु

<u>दाशरथ्यष्टक</u>

From Shri Bannanje Govindacharya's 14 haadgalu book

**Smt.Shubhalakshmi Rao**

**https://www.youtube.com/watch?v=l_BG1c-KDm0**

https://sites.google.com/site/madhwaprameyaqa/ganamruta

क्षीरसागरवारिमध्यमहाहिभोगनिवासिनं
नारदादिमुनींद्रवंदितचारुपादसरोरुहम् ।
वारिजामलपत्रलोचनमब्धिजारमणं विभुं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥१॥

पाकशासनवंदितामलपादयुग्मसरोरुहं
शोकनाशनमीशमीशमशेषदोषविवर्जितम् ।
लोकसंभवसंहृतिस्थितिहेतुभूतगुणोदयं
नाकवासिजनप्रियं प्रणमामि दाशरथिं सदा ॥२॥

अंडजाधिपवाहनं शशिमंडलाभमुखं महा-
दंडकावनसेवितं वरकुंडलांगदभूषणम् ।
चंडविक्रमखंडितासुरमंडलं मधुसूदनं
पांडवप्रियसारथिं प्रणमामि दाशरथिं सदा ॥३॥

तर्कनिश्चितचित्तवृत्तिभिरप्रतर्क्यगुणोदयं
शक्रगर्वविदारणं धृतचक्रमक्रमवर्जितम् ।
अर्कमंडलमध्यवर्तिनमक्षयं पुरुषोत्तमं

शुक्रनेत्रहरं हरिं प्रणमामि दाशरथिं सदा ॥४॥

बालकेलिमशेषदानवनाशनं प्रणवात्मकं
स्थूलसूक्ष्मतनुं विभुं गुणकारणात्मगुणोदयम् ।
लीलया धृतभूधरं परिपालिताखिलगोकुलं
नीलकुंचितमूर्धजं प्रणमामि दाशरथिं सदा ॥५॥

मंदराचलधारिणं दशकंधरादिविनाशनं
नंदनांगमुमापतेः प्रियमिंदिरावरमच्युतम् ।
कंदजासनसेवितं सुरवृंदवंदितविग्रहं
नंदगोपसुतं हरिं प्रणमामि दाशरथिं सदा ॥६॥

कंसमुष्टिकदुष्टधेनुकपूतनादिविनाशनं
हंसकेशिनिसूदनं दमघोषसूनुविदारणम् ।
अंसमध्यलसन्महामणिकौस्तुभादिविराजितं
हिंसकासुरभेदकं प्रणमामि दाशरथिं सदा ॥७॥

गोपिमंडलमध्यगं सुरवैरिमंडलदारिणं
पांडवप्रियमिंद्रपूर्वसुरौघवंद्यपदांबुजम् ।
इंदिरारमणं गुणार्णवमंबुजाक्षममानुषं
नारसिंहतनुं हरिं प्रणमामि दाशरथिं सदा ॥८॥

भक्तिपूर्वकमेतदष्टकमिष्टसिद्धिदमादराद्
यस्तु कीर्तयते शृणोत्यखिलापदर्णवतारकम् ।
सर्वदेववरार्चितं नृहरेः पदं परमक्षयं

याति दाशरथेरनुग्रहविग्रहो~खिलवल्लभः ॥९॥